ॐ श्री परमात्मने नमः

om śrī paramātmane namaḥ

श्रीमद् भगवद् गीता

śrīmad bhagavad gītā

अथ द्वादशोऽध्यायः। भक्तियोगः

atha dvādaśo'dhyāyaḥ| (bhaktiyogaḥ)

अर्जुन उवाच।

arjuna uvāca |

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।

ये चाप्यक्शरमव्यक्तं तेषां के योगवित्तमाः॥ १२.१॥

evaṁ satatayuktā ye bhaktāstvāṁ paryupāsate |
ye cāpyakśaramavyaktaṁ teṣāṁ ke yogavittamāḥ || 12.1||

श्रीभगवानुवाच।

śrībhagavānuvāca |

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।

श्रद्धया परयोपेताः ते मे युक्ततमा मताः॥ १२.२॥

mayyāveśya mano ye māṁ nityayuktā upāsate |
śraddhayā parayopetāḥ te me yuktatamā matāḥ || 12.2||

ये त्वक्शरमनिर्देश्यं अव्यक्तं पर्युपासते।

सर्वत्रगमचिंत्यंच कूटस्थं अचलंध्रुवम्॥ १२.३॥

ye tvakśaramanirdeśyam avyaktaṁ paryupāsate |
sarvatragamacintyañca kūṭastham acalandhruvam || 12.3||

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयाः।

ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ १२.४॥

sanniyamyendriyagrāmaṁ sarvatra samabuddhayāḥ |
te prāpnuvanti māmeva sarvabhūtahite ratāḥ || 12.4||